card

M. T. B. COLLEGE, SURAT

*Manuscripts Library*

No. Ref. / Ser. 956

Title: [illegible]
Shiksha Jyotisha

Pha. 4.

736

736

छंद - निघंट - शिक्षा व ज्योतिष.

| | |
|---|---|
| Chhanda - Shiksha - Nighantā & Jyotisha | Title |
| | Author |
| | Editor |
| Shaka 1643 | Year, Vols. |
| | Publisher |
| 736 | Remarks |

736

श्रीगणेशाय नमः॥ मयरसतजभनलगसम्मितं भ्रमति वाङ्मयं जगति यस्य॥ स जयति पिंगलनागः शिवप्रसादाद्विशुद्धमतिः॥१॥ त्रिगुरुं विद्धि
मकारं लघ्वादिसमन्वितं यकाराख्यं॥ लघुमध्यमंतु रेफं सकारमंते गुरु निबद्धं॥ लघ्वंतसहितकारं जकारमुभयोर्लघुं विजानीयात्॥ आदिगु
रुं च भकारं नकारमिह पैंगले त्रिलघुं॥ दीर्घं संयोगपरं तथा प्लुतं व्यंजनांतमूष्मांतं॥ सानुस्वारं च गुरुं क्वचिदवसानेपि लघ्वंत्यं॥ आदिमध्यावसा
नेषु यरता यांति लाघवं॥ भजसा गौरवं यांति मनौ तु गुरुलाघवं॥ त्रिविरामं दशावर्णविषयमात्र मुवाच पिंगलः सूत्रं॥ छंदोवर्गपदार्थप्रत्ययहेतोश्च
शास्त्रादौ॥१॥ धीश्रीस्त्रीम्॥ वरासा य्॥ कागुहार्॥ वसुधा स्॥ सा ते क्व त्॥ कदा सज ज्॥ किं वद भ्॥ न हसन् न्॥ गृ ल्॥ गंते॥ आ द्विपरः॥ हे॥ लौ सः॥ ग्लो॥
अष्टौ वसवः इति॥२॥ छंदः॥ गायत्री॥ दैव्येकं॥ आसुरी पंचदश॥ प्राजापत्याष्टौ॥ यजुषां षट्॥ साम्नां द्विः॥ ऋचां त्रिः॥ द्वौ द्वौ साम्नां वर्धेत॥ त्रीं स्त्रीन् ऋ
चां॥ चतुरश्चतुरः प्राजापत्यायाः॥ एकैकं शेषे॥ जह्याद् आसुरी॥ तान्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यः॥ तिस्रस्तिस्रः समानाम्॥ एकैका ब्रा
ह्मयः॥ प्राग्यजुषाम् आर्ष्यः इति॥३॥ पादः॥ इयादिपूरणः॥ कं गायत्र्या वसवः॥ जगत्या आदित्याः॥ विराजो दिशः॥ त्रिष्टुभो रुद्राः॥ एकद्वित्रिचतु
ष्पादुक्तपादं॥ आद्यं चतुष्पात् ऋतुभिः॥ क्वचित्त्रिपाद् ऋषिभिः॥ सा पादनिचृत्॥ षट्कसप्तकयोर्मध्ये ष्टावतिपादनिचृत्॥ द्वौ नवकौ षट्कश्च नागी॥ विप
रीता वाराही॥ षट्कसप्तकाष्टकैर्वर्धमाना॥ विपरीता प्रतिष्ठा॥ तृतीयं द्विपाज्जागतगायत्राभ्यां॥ त्रिपात् त्रैष्टुभैः॥ उष्णिग्गायत्रौ जागतश्च॥ ककुम् म
ध्येचेदंत्यः॥ पुरउष्णिक्पुरः॥४॥ परोष्णिक्परः॥ चतुष्पाद् ऋषिभिः॥ अनुष्टुब्गायत्रैः॥ त्रिपात्क्वचिज्जागताभ्यां च॥ मध्येंते च॥ बृहती जागतस्त्र

छंदः

यश्च गायत्र्याः पथ्यापूर्वश्चेत्तृतीयः न्यङ्कुसारिणी द्वितीयः स्कंधोग्रीवी क्रौष्टुकेः उरोबृहती यास्कस्य उपरिष्टाद्बृहत्यंते पुरस्ताद्बृहती पुरः
१ क्वचिन्नवकाश्चत्वारः वैराजौ गायत्रौ च त्रिभिर्जागतैर्महाबृहती सतोबृहती ताण्डिनः पंक्तिर्जागतौ गायत्रौ च पूर्वौ चेद्युजौ सतःपंक्तिः
विपरीतौ च आस्तारपंक्तिः परतः ५ प्रस्तारपंक्तिः पुरतः विष्टारपंक्तिरंतः संस्तारपंक्तिर्बहिः अक्षरपंक्तिः पंचकाश्चत्वारः
द्वावप्यल्पशः पदपंक्तिः पंच चतुष्कषट्कौ त्रयश्च पथ्या पंचभिर्गायत्रैः जगती षड्भिः एकेन त्रिष्टुब्ज्योतिष्मती तथा जगती पुर
स्ताज्ज्योतिः प्रथमेन मध्येज्योतिर्मध्यमेन उपरिष्टाज्ज्योतिरंत्येन एकस्मिन्पंचके छंदः शंकुमती षट्के ककुद्मती त्रिपादणिष्ठमध्या
पिपीलिकमध्या विपरीता यवमध्या ऊनाधिकेनैकेन निचृद्भुरिजौ द्वाभ्यां विराट्स्वराजौ आदितः संदिग्धे ६ देवतादितश्च अग्निः
सविता सोमो बृहस्पतिर्मित्रावरुणाविंद्रो विश्वेदेवा देवताः स्वराः षड्जऋषभगांधारमध्यमपंचमधैवतनिषादाः सितसारंगपिशंगकृ
ष्णनीललोहितगौरा वर्णाः अग्निवेश्यकाश्यपगौतमांगिरसभार्गवकौशिकवासिष्ठानि गोत्राणि त्र्यामान्यतिछंदांसि रोचनाभाः कृ
तयः अनुक्तानां कामतो वर्णा इति ७ चतुःशतमुत्कृतिः चतुरश्चतुरस्त्यजेदुत्कृतेः तान्यभिसंख्यायेभ्यः कृतिः प्रकृत्याच
धृत्यष्टिशक्वरीजगत्यः पृथक्पृथक्पूर्वतरतान्येषां द्वितीयं द्वितीयमतितः अथ लौकिकं आत्रेष्ठभाश्वयदार्षं पादश्चतुर्भागः
यथावृत्तसमाप्तिर्वा लः समुद्रा गणाः गौगं तमध्यादिर्न्लौ च स्वरार्धं चार्यार्धं अत्रायुङ्न ज षष्ठो न्लौ वा न्लौ चेत्पदं द्वि १

चूलिकार्धमेकोनत्रिंशदंतेग् वृत्तिपाठः

तीयादि सप्तमः प्रथमादि अंत्ये पंचमः ८ षष्ठश्च लः त्रिषु गणेषु पादः पथ्याद्ये च विपुलान्या चपला द्वितीयचतुर्थौ ग्मध्ये जौ पूर्वे मुखपूर्वा जघन
पूर्वेतरत्र उभयोर्महाचपला आद्यर्धसमा गीतिः अंत्येनोपगीतिः उत्क्रमेणोद्गीतिः अर्धे वसुगण आर्यागीतिः वैतालीयं द्विःस्वरा अयुक्पा
दे युग्वसवोंते ल्गौ गौपच्छंदसिकं आपातलिका भौ ग् शेषे परेण युङ्न साकं षड्वा मिश्रा युजि पंचमेन पूर्वः साकं प्राच्यवृत्तिः अयुक्तृतीयेनोदी
च्यवृत्तिः आभ्यां युगपत्प्रवृत्तकं अयुक्चारुहासिनी ९ युगपरांतिका गंताद्विर्वसवो मात्रासमकं लो नवमः द्वादशश्च वानवासिका विश्लोकः पं
चमाष्टमौ चित्रा नवमश्च परयुक्तेनोपचित्रा एभिः पादाकुलकं गीत्यार्या लः शिखा विपर्यस्तार्धा लः पूर्वश्चेज्ज्योतिः गश्चेत्सौम्या चूलि
कैकोनत्रिंशदेकत्रिंशदंते ग् साम्येन न समा लां ग्ल इति १० वृत्तं सममर्धसमं विषमं च समं तावत्कृत्वः कृतमर्धसमं विषमं च राश्यूनं। क्लि
तिस्मानी लौतिप्रमाणी वितानमन्यत् पादस्यानुष्टुब्वक्त्रं न प्रथमात्स्नौ द्वितीयचतुर्थयोरश्च वान्यत् यच्चतुर्थात् पथ्यायुजोर्ज् वि
परीतैकीयं चपलायुजोर्न् विपुलायुग्लः सप्तमः सर्वतः सैतवस्य भ्रौन्तौ च प्रतिपादं चतुर्वृद्ध्या पदचतुरूर्ध्वं ग् गावंत आपीडः ११ गावादौ चे
त्प्रत्यापीडः प्रत्यापीडो गावादौ च प्रथमस्य विपर्यासे मंजरी लवल्यमृतधाराः उद्गतामेकतः स्जौ स्लौ न्सौ ज्गौ भ्नौ ज्लौ ग् स्जौ स्जौ ग् तृतीयस्य
सौरभकं र्न्भौ ललितं न्सौ उपस्थितप्रचुपितं पृथगाद्यम्सौ ज्भौ गौ स्नौ ज्नौ ग्नौ स्नौ न्जौ य् वर्धमानं तृतीयं न्सौ स्नौ न्सौ शुद्धविराडृषभं
तज्ज्याः अर्धे उपचित्रकं सौ स्लौ ग्भौ भौ ग्ग् द्रुतमध्या भौ भौ ग्न्जौ ज्यौ वेगवती सौ स्गौ भौ भौ ग्ग् भद्रविराट् त्जौ ग्मौ स्जौ ज्गौ ग् केतुमती

एतद्वृत्तिकारवाक्यं ५

स्तौ स्गौ भ्रौ न्गौ ग् आख्यानकी तौ ज्गौ ग्त्तौ ज्गौ ग् विपरीताख्यानकी ज्तौ ज्गौ न्तौ ज्गौ ग्। हरिणप्लुता सौ स्लौ ग्भौ भ्रौ अपरवक्त्रं नौ र्लौ ग्न्लौ ज्रौ।
पुष्पिताग्रा नौ र्यौ न्जौ ज्रौ ग् १२ यवमती रौ जौ ज्रौ ज्रौ ग् शिखैकान्नत्रिंशदेकत्रिंशदंते ग् खंजा महत्सु पूर्वी ति १३ यतिर्विच्छेदः तनुमध्या त्यौ कु
मारललिता ज्सौ ग् माणवकाक्रीडितकं भ्तौ ल्गौ चित्रपदा भौ गौ विद्युन्माला मौ गौ भुजगशिशुसृता नौ म् हलमुखी र्नौ स् शुद्धविराण्म्सौ ज्गौ
पणवो म्नौ य्गौ रुक्मवती भ्मौ स्गौ मयूरसारिणी र्जौ र्गौ मत्ता म्भौ स्गौ उपस्थिता त्जौ ज्गौ एकरूपं सौ ज्गौ इंद्रवज्रा तौ ज्गौ ग् उपेंद्रवज्रा ज्तौ ज्गौ ग्
आद्यंतावुपजातयः दोधकं भौ भौ शालिनी म्तौ तौ ग्गौ समुद्रऋषयः १४ वातोर्मी म्भौ तौ गौ च भ्रमरविलसितं म्भौ न्लौ ग् रथोद्धता र्नौ र्लौ ग् स्वागता
र्नौ भौ गौ वृत्ता नौ स्गौ ग् श्येनी र्जौ र्लौ ग् जगती वंशस्था ज्तौ ज्रौ इंद्रवंशा तौ ज्रौ द्रुतविलंबितं न्भौ भ्रौ तोटकं सः पुटो नौ म्यौ वसुसमुद्राः जलोद्ध
तगतिर्ज्सौ ज्सौ रसर्तवः भुजंगप्रयातं यः स्रग्विणी रः प्रमिताक्षरा स्जौ स्सौ वैश्वदेवी मौ यौ इंद्रियऋषयः नवमालिनी न्जौ भ्यौ इति १५ प्रहर्षिणी म्नौ
ज्रौ ग्त्रिकदशकौ रुचिरा ज्भौ स्जौ ग्समुद्रनवकौ मत्तमयूरं म्तौ य्सौ ग् असंबाधा म्तौ न्सौ गा इंद्रियनवकौ अपराजिता नौ र्सौ ल्गौ स्वरऋषयः प्रहरण
कलिता नौ भ्नौ ल्गौ च वसंततिलका त्भौ ज्जौ गौ सिंहोन्नता काश्यपस्य उद्धर्षिणी सैतवस्य चंद्रावर्ता नौ स्नौ मालतिर्नवकौ चेत् मणिगुणनिक
रो वसुऋषयः मालिनी नौ म्यौ य्सौ ऋषभगजविलसितं भ्रौ नौ न्गौ स्वरनवकौ हरिणी न्सौ म्रौ स्लौ ग् रससमुद्रऋषयः पृथ्वी ज्सौ ज्सौ य्लौ ग् वसुन
वकौ वंशपत्रपतितं भ्रौ न्भौ न्लौ ग् दिङ्मुनयः मंदाक्रांता म्भौ न्तौ तौ ग्गौ समुद्रर्तुस्वराः शिखरिणी य्मौ न्सौ भ्लौ ग् रुद्राः कुसुमितलतावेल्लि २

ता म्तौ न्यौ यौ इंद्रियर्तुस्वराः १६ शार्दूलविक्रीडितं म्सौ ज्सौ तौ तौ गादित्यऋषयः सुवदना म्रौ भ्नौ य्भौ ल्गौ स्वररसऋषिरसाः ग्लितिवृत्तं स्रग्धरा म्रौ भ्नौ
यौ त्रिःसप्तकाः मद्रकं भ्रौ न्रौ न्रौ न्गौ दिगादित्याः अश्वललितं न्जौ भ्जौ भ्जौ भ्लौ ग् रुद्रादित्याः मत्ताक्रीडा मौ त्नौ नौ न्लौ ग् वसुपंचदशकौ तन्वी भ्तौ न्सौ
भ्नौ यौ द्विरादित्याः क्रौंचपदा भ्मौ स्भौ नौ नौ न्गौ भूतेंद्रियवसुऋषयः भुजंगविजृंभितं मौ त्नौ नौ र्सौ ल्गौ वसुरुद्रऋषयः अपवाहको म्नौ नौ नौ न्सौ
गौ नवकर्तुरसेंद्रियाणि दंडको नौ रः प्रथमश्चंडवृष्टिप्रपातः अन्यत्र रातमांडव्याभ्यां शेषः प्रचित इति १७ अत्रानुक्तं गाथा द्विकौ ग्लौ
मिश्रौ च पृथग्लामिश्राः ॥ वसवस्त्रिकाः ॥ ल् अर्धे सैके ग् ॥ प्रतिलोमगुणं द्विर्लाद्यं ततो ग्येकं जह्यात् द्विरर्धे रूपे शून्यं द्विः शून्ये तावदर्धतद्गुणि
तं द्विर्द्व्यूनं तदंतानां ॥ एकोनेद्धा ॥ परे पूर्णं परे पूर्णमिति ॥१८॥ ॥ मयद्वादशधीः पंचदश छंदः षोडशपादः परोष्णिक्प्रस्तारपंक्ति विंशतिर्वि
शतिरेकविंशतिर्दैवता द्विनोष्टौ चतुःशतं पञ्चविंशतिर्विंशतिर्युगपरांतिका त्रयोदश वृत्तं गाथा दो विंशति विंशतिर्यवमती णित्री यतिर्विंशति
वीतो मश्मष्टादश प्रहर्षिणी विंशतिः शार्दूलविक्रीडितं पंचदशाद्यानुक्तं सप्तदशाष्टादश ॥ ॥ इति छंदः समाप्तः ॥ ॥ ६२ ॥ गौः । ग्मा । ज्मा
। क्ष्मा । क्षा । क्षमा । क्षोणी । क्षितिः । अवनिः । उर्वी । पृथ्वी । मही । रिपः । अदितिः । इळा । निर्ऋतिः । भूः । भूमिः । पूषा । गातुः । गोत्रेत्येकविंशतिः पृथिवी
नामधेयानि १ हेम । चंद्रं । रुक्मं । अयः । हिरण्यं । पेशः । कृशनं । लोहं । कनकं । कांचनं । भर्म । अमृतं । मरुत् । दत्रं । जातरूपमिति पंचदश हिरण्य
नामानि २ अंबरं । वियत् । व्योम । बर्हिः । धन्व । अंतरिक्षं । आकाशं । आपः । पृथिवी । भूः । स्वयंभूः । अध्वा । पुष्करं । सगरः । समुद्रः । अध्वरमिति

श्री

षोडशांतरिक्षनामानि ३ स्वः।पृश्निः।नाकः।गौः।विष्टप्।नभ इति षट् साधारणानि ४ खेदयः।किरणाः।गावः।रश्मयः।अभीशवः।दीधितयः।गभस्त
यः।वनं।उस्राः।वसवः।मरीचिपाः।मयूखाः।सप्त ऋषयः।साध्याः।सुपर्णा इति पंचदश रश्मिनामानि ५ आताः।आशाः।उपराः।आष्ठाः।काष्ठाः।व्योम।
ककुभः।हरित इत्यष्टौ दिङ्नामानि ६ श्यावी।क्षपा।शर्वरी।अक्तुः।ऊर्म्या।राम्या।यम्या।नम्या।दोषा।नक्ता।तमः।रजः।असिक्नी।पयस्वती।तमस्वती॥
घृताची।शिरिणा।मोकी।शोकी।ऊधः।पयः।हिमा।वस्वी इति त्रयोविंशती रात्रिनामानि ७ विभावरी।सूनरी।भास्वती।ओदती।चित्रामघा।अर्जुनी।वा
सू॰ता। जिनी।वाजिनीवती।सुम्नावरी।अहना।द्योतना।श्वेत्या।अरुषी।सूनृतावती।सूनृतावरीति षोडशोषोनामानि ८ वस्तोः।द्युः।भानुः।वासरं।स्वसरा
णि।घ्रंसः।घर्मः।घृणः।दिनं।दिवा।दिवेदिवे।द्यविद्यवीति द्वादशाहर्नामानि ९ अद्रिः।ग्रावा।गोत्रः।बलः।अश्नः।पुरुभोजाः।बलिशानः।अश्मा।पर्व
तः।गिरिः।व्रजः।चरुः।वराहः।शंबरः।रौहिणः।रैवतः।फलिगः।उपरः।उपलः।चमसः।अहिः।अभ्रं।बलाहकः।मेघः।दृतिः।ओदनः।वृषंधिः।वृ
त्रः।असुरः।कोश इति त्रिंशन्मेघनामानि १० श्लोकः।धारा।इळा।गौः।गौरी।गांधर्वी।गभीरा।गंभीरा।मंद्रा।मंद्राजनी।वाशी।वाणी।वाणी
ची।वाणः।पविः।भारती।धमनिः।नाळीः।मेळिः।मेना।सूर्या।सरस्वती।निवित्।स्वाहा।वग्नुः।उपब्दिः।मायुः।काकुत्।जिह्वा।घोषः।स्वरः।शब्दः।
स्वनः।ऋक्।होत्रा।गीः।गाथा।गणः।धेना।ग्नाः।विपा।नना।कशा।धिषणा।नौः।अक्षरं।मही।अदितिः।शची।वाक्।अनुष्टुप्।धेनुः।वल्गुः। २
गल्दा।सरः।सुपर्णी।बेकुरेति सप्तपंचाशद्वाङ्नामानि ११ अर्णः।क्षोदः।क्षद्म।नभः।अंभः।कवंधं।सलिलं।वाः।वनं।घृतं।मधु।पुरीषम्।

पिप्पलं।क्षीरं।विषं।रेतः।कशः।जन्म।वृबूकं।बुसं।तुग्र्या।बुर्बुरं।सुक्षेम।धरुणं।सुरा।अररिंदानि।ध्वस्मन्वत्।जामि।आयुधानि।क्षपः।अहिः।अक्षरं।स्रो
तः।तृप्तिः।रसः।उदकं।पयः।सरः।भेषजं।सहः।शवः।यहः।ओजः।सुखं।क्षत्रं।आवयाः।शुभं।यादुः।भूतं।भुवनं।भविष्यत्।आपः।महत्।व्योम।यशः।महः।
सर्णीकं।स्वृतीकं।सतीनं।गहनं।गभीरं।गंभरं।ईं।अन्नं।हविः।सद्म।सदनं।ऋतं।योनिः।ऋतस्य योनिः।सत्यं।नीरं।रयिः।सत्।पूर्णं।सर्वं।अक्षितं।बर्हिः।
नाम।सर्पिः।अपः।पवित्रं।अमृतं।इंदुः।हेम।स्वः।सर्गाः।शंबरं।अभ्वं।वपुः।अंबु।तोयं।तूयं।कृपीटं।शुक्रं।तेजः।स्वधा।वारि।जलं।जलाषं।इदमित्ये
कशतमुदकनामानि १२ अवनयः।यव्याः।खाः।सीराः।स्रोत्याः।एन्यः।धुनयः।रुजानाः।वक्षणाः।खादोअर्णाः।रोधचक्राः।हरितः।सरितः।अ
ग्रुवः।नभन्वः।वध्वः।हिरण्यवर्णाः।रोहितः।सस्रुतः।अर्णाः।सिंधवः।कुल्याः।वर्यः।उर्व्यः।इरावत्यः।पार्वत्यः।स्रवंत्यः।ऊर्जस्वत्यः।पयस्वत्यः।सीत
स्वत्यः।सरस्वत्यः।हरस्वत्यः।रोधस्वत्यः।भास्वत्यः।अजिराः।मातरः।नद्य इति सप्तत्रिंशन्नदीनामानि १३ अत्यः।हयः।अर्वा।वाजी।सप्तिः।वह्निः।
दधिक्राः।दधिक्रावा।एतग्वः।एतशः।पैद्वः।दौर्गहः।औच्चैःश्रवसः।तार्क्ष्यः।आशुः।ब्रध्नः।अरुषः।मांश्चत्वः।अव्यथयः।श्येनासः।सुपर्णाः।पतंगाः।
नरः।ह्वार्याणाः।हंसासः।अश्वा इति षड्विंशतिरश्वनामानि १४ हरी इंद्रस्य।रोहितोऽग्नेः।हरित आदित्यस्य।रासभावश्विनोः।अजाः पूष्णः।पृषत्यो
मरुतां।अरुण्यो गाव उषसां।श्यावाः सवितुः।विश्वरूपा बृहस्पतेः।नियुतो वायोरिति दशादिष्टोपयोजनानि १५ भ्राजते।भ्राशते।भ्राश्यति।
दीदयति।शोचति।मंदते।भंदते।रोचते।ज्योतते।द्योतते।द्युमदित्येकादश ज्वलतिकर्माणः १६ जमत्।कल्मलीकिनं।जंजणाभवन्।मल्मला

४ लाभवन्तः। अर्चिः। शोचिः। तपः। तेजः। हरः। हृणिः। शृंगाणि। शृंगाणीत्येकादश ज्वलतो नामधेयानि १७ ॥ ॥ गोर्हमांबरस्वशः स्वदयश्राताः
श्यावी। विभावरी। वस्तोः। रद्धिः। श्लोकोर्णाव। नेयोत्योहरी इंद्रस्य भ्राजतेज मदितिस सहस्रा ॥ ॥ ७ इति निघंटौ प्रथमो ध्यायः ॥ ॥ अपः। अप्नः। दंसः। वे
षः। वेपः। विष्ट्वी। व्रतं। कर्वरं। कृत्वी। शक्म। क्रतुः। करणानि। करांसि। करिक्रत्। करंती। चक्रत्। कर्त्वं। कर्तोः। कर्तवै। कृत्वी। धीः। शची। शमी। शिमी। श
क्तिः। शिल्पमिति षड्विंशतिः कर्मनामानि। १। तुक्। तोकं। तनयः। तोक्म। तक्म। शेषः। अप्नः। गयः। जाः। अपत्यं। यहुः। सूनुः। नपात्। प्रजा। बीजमि
ति पंचदशापत्यनामानि। २। मनुष्याः। नरः। धवाः। जंतवः। विशः। क्षितयः। कृष्टयः। चर्षणयः। नहुषः। हरयः। मर्याः। मर्त्याः। मर्ताः। व्राताः। तुर्वशाः।
द्रुह्यवः। आयवः। यदवः। अनवः। पूरवः। जगतः। तस्थुषः। पंचजनाः। विवस्वंतः। पृतनाः इति पंचविंशतिर्मनुष्यनामानि। ३। आयती। च्यवाना। अभीशू।
अप्नवाना। विनंगृसो। गभस्ती। कवस्नौ। बाहू। भुरिजौ। क्षिपस्ती। शक्वरी। भरित्रे इति द्वादश बाहुनामानि। ४। अग्रुवः। अण्व्यः। क्षिपः। विशः। श
र्याः। रशनाः। धीतयः। अथर्यः। विपः। कक्ष्याः। अवनयः। हरितः। स्वसारः। जामयः। सनाभयः। योक्त्राणि। योजनानि। धुरः। शाखाः। अभीशवः।
दीधितयः। गभस्तय इति द्वाविंशतिरंगुलिनामानि। ५। वश्मि। उश्मसि। वेति। वेनति। वेसति। वांछति। वष्टि। वनोति। जुषते। हर्यति। आचके।
उशिक्। मन्यते। छंत्सत्। चाकनत्। चकमानः। कनति। कानिषत् इत्यष्टादश कांतिकर्माणः। ६। अंधः। वाजः। पयः। श्रवः। पृक्षः। पितुः। सुनं।
सिनं। अवः। क्षु। धासिः। इरा। इळा। इषं। ऊर्क्। रसः। स्वधा। अर्कः। क्षद्म। नेमः। ससं। नमः। आयुः। सूनृता। ब्रह्म। वर्चः। कीलालं। यशइत्स ॥४॥

ष्टाविंशतिरन्ननामानि। ७। आवयति। भर्वति। बभस्ति। वेति। वेवेष्टि। अविष्यन्। बप्सति। भसथः। बब्धां। ह्वरतीति दशात्तिकर्माणः। ८। ओजः। पाजः। शवः।
तवः। तरः। त्वक्षः। शर्धः। बाधः। नृम्णं। तविषी। शुष्मं। शुष्णं। दक्षः। वीळु। च्यौत्नं। शूषं। सहः। यहः। वधः। वर्गः। वृजनं। वृक्। मज्मना। पौंस्यानि। धर्णसि।
द्रविणं। स्यंद्रासः। शंबरमित्यष्टाविंशतिर्बलनामानि। ९। मघं। रेक्णः। रिक्थं। वेदः। वरिवः। श्वात्रं। रत्नं। रयिः। क्षत्रं। भगः। मीळ्हं। गयः। द्युम्नं। इंद्रि
यं। वसु। रायः। राधः। भोजनं। तना। नृम्णं। बंधुः। मेधा। यशः। ब्रह्म। द्रविणं। श्रवः। वृत्रं। ऋतमित्यष्टाविंशतिरेव धननामानि १० अघ्न्या। उस्रा। उ
स्रिया। अही। मही। अदितिः। इळा। जगती। शक्वरीति नव गोनामानि ११ रेळते। हेळते। भामते। हृणीयते। श्रीणाति। त्रेषति। दोधति। वनुष्यति। कंप
ते। भोजत इति दश क्रुध्यतिकर्माणः १२ हेळः। हरः। हृणिः। त्यजः। भामः। एहः। ह्वरः। तपुषी। जूर्णिः। मन्युः। व्यथिरित्येकादश क्रोधनामानि १३
वर्तते। अयते। लोटते। लोठते। स्यंदते। कसति। सर्पति। स्यमति। स्रवति। स्रंसते। अवति। श्रोतति। ध्वंसति। वेनति। मार्ष्टि। भुरण्यति। शवति। काल
यति। पेलयति। कंटति। पिस्यति। विस्यति। मिस्यति। प्रवते। प्लवते। च्यवते। गेवते। केवते। नवते। क्षोदति। नक्षति। सक्षति। म्यक्षति। सचति। ऋच्छ
ति। तुरीयति। चतति। अतति। गाति। इयक्षति। सश्चति। सरति। रंहति। यतते। भ्रमति। ध्रजति। रजति। लजति। क्षियति। धमति। मिनाति। ऋण्व
ति। कृणोति। स्वरति। सिसर्ति। वेविष्टि। योषिष्टि। रिणाति। रीयते। रेजति। दध्यति। धन्वति। अरुषति। आर्यति। डीयते। तकति। दीयति। ईष
ति। फणति। हनति। अर्दति। मर्दति। सस्र्ते। नसते। हर्यति। द्रयति। ईर्ते। ईखते। जयति। दभ्नोति। युध्यति। क्षति। श्वांचति। गोति। आगमनीगंति। जंग

तिजिन्वति।जसति।गमति।श्रति।श्राति।श्रयति।वहते।रथर्यति।जेहते।ष्वः कति।स्कंपति।प्साति।वाति।याति।ईषति।द्राति।कूकति।एजति।जम
ति।जवति।वंचति।श्रानिति।पवते।हंति।सधति।अगन्।अजगन्।जिगाति।पतति।इन्वति।द्रमति।द्रवति।वेति।हर्यतात्।एति।जगायात्।अयुथु
रितिद्वाविंशंशतं कंतिर्वा कर्माणः॥१४॥नु।मक्षु।द्रवत्।ऊषं।जीराः।जूर्णिः।शूर्ताः।शूघनासः।शीभं।तृषु।तूयं।तूर्णिः।अजिरं।भुरण्युः।आशु।
आशुः।प्राशुः।तूतुजिः।तूतुजानः।तुज्यमानासः।अज्राः।साची।वित्।द्युगत्।ताजत्।तरणिः।वातरंहा इतिषड्विंशतिः क्षिप्रनामानि॥१५॥त
ळित्।आसात्।अंबरं।तुर्वशे।अस्तमीके।आके।उपाके।अर्वाके।अंतमानां।अवमे।उपमइत्येकादशांतिकनामानि॥१६॥रणः।विवाक्।विखा
दः।नदनुः।भरे।आक्रंदे।आहवे।आजौ।पृतनाज्यं।अभीके।समीके।ममसत्यं।नेमधिता।संकाः।समितिः।समनं।मीळ्हे।पृतनाः।स्पृधः।मृ
धः।पृत्सु।समत्सु।समर्ये।समरणे।समोहे।समिथे।संख्ये।संगे।संयुगे।संगथे।संगमे।वृत्रतूर्ये।पृक्षे।आणौ।शूरसातौ।वाजसातौ।सम
नीके।खले।खजे।पौंस्ये।महाधने।वाजे।अज्म।सद्म।संयत्।संवतइतिषट्चत्वारिंशत्संग्रामनामानि॥१७॥इन्वति।नक्षति।आक्षाणः।आ
नट्।आष्ट।आपानः।अशोत्।नशत्।आनशे।अश्नुत इतिदशव्याप्तिकर्माणः॥१८॥दभ्नोति।श्नथति।ध्वरति।धूर्वति।वृणक्ति।वृश्चति।
कृणवति।कृंतति।श्वसिति।नभति।अर्दयति।स्तृणाति।स्नेहयति।यातयति।स्फुरति।स्फुलति।निवपंतु।अवतिरति।वियातः।आतिरत्।
तळित्।आखंडल।दृणाति।रम्णाति।शृणाति।शम्नाति।तळ्हि।ताळ्हि।नितोशते।निबर्हयति।मिनाति।मिनोति।धमतीतित्रयस्त्रिं

शद्वधकर्माणः॥१९॥दिद्युत्।नेमिः।हेतिः।नमः।पविः।सृकः।वृकः।वधः।अर्कः।वज्रः।कुत्सः।कुलिशः।तुंजः।तिग्मः।मेनिः।स्वधितिः।सायकः।
परशुरित्यष्टादशवज्रनामानि॥२०॥इरज्यति।पत्यते।क्षयति।राजतीतिचत्वारऐश्वर्यकर्माणः॥२१॥राष्ट्री।अर्यः।नियुत्वान्।इनइनइतिचत्वा
रीश्वरनामानि॥२२॥ ॥अपस्कइनुघ्यां आयुत्यश्युवोवश्यंध आवयुत्वोऔमघमघ्यारेळते हेळोवतेनेनुतळिद्रणाइन्वतिदभ्नोतिदिद्यु
दिरज्यतिराष्ट्रीद्वाविंशतिः॥ ॥इतिद्वितीयोध्यायः॥ ॥उरु।तुवि।पुरु।भूरि।शश्वत्।विश्वं।परीणसा।व्यानशिः।शतं।सहस्रं।सलिलं।कु
विदितिद्वादश बहुनामानि॥१॥ऋहन्।ह्रस्वः।निधृष्वः।मायुकः।प्रतिष्ठा।कृधु।वम्रकः।दभ्रं।अर्भकः।क्षुल्लकः।अल्पइत्येकादश ह्रस्वनामा
नि॥२॥महत्।ब्रध्नः।ऋष्वः।बृहत्।उक्षितः।तवसः।महिषः।तविषः।अभ्वः।ऋभुक्षाः।उक्षा।विहायाः।यह्वः।ववक्षिथ।विवक्षसे।अंभृणः।मा
हिनः।गभीरः।ककुहः।रभसः।आधन्।विरप्शी।अद्भुतं।बर्हिष्ठः।बर्हिषदितिपंचविंशतिर्महन्नामानि॥३॥गयः।कृदरः।गर्तः।हर्म्यं।अस्तं॥
पस्त्यं।दुरोणे।नीळं।दुर्याः।स्वसराणि।अमा।दमे।कृत्तिः।योनिः।सद्म।शरणं।वरूथं।छर्दिः।छदिः।छाया।शर्म।अज्मेतिद्वाविंशतिर्गृह
नामानि॥४॥इरज्यति।विधेम।सपर्यति।नमस्यति।दुवस्यति।ऋध्नोति।ऋणद्धि।ऋच्छति।सपति।विवासतीतिदशपरिचरणकर्माणः
॥५॥शिंबाता।शतरा।शातपंता।शिल्गुः।स्यूमकं।शेवृधं।मयः।सुग्म्यं।सुदिनं।शूषं।शुनं।शग्मं।भेषजं।जलाषं।स्योनं।सुम्नं।शेवं।शि
वं।शं।कमितिविंशतिःसुखनामानि॥६॥निर्णिक्।वव्रिः।वर्पः।वपुः।अमतिः।अप्सः।प्सुः।अप्नः।पिष्टं।पेशः।कृशनं।मरुत्।अर्जुनं।

॥ ९ ॥ ताम्रं। अरुषं॥ शिल्पमिति षोडश रूपनामानि॥ ७॥ अस्नेमा। अनेमा। अनेद्यः। अनवद्यः। अनभिशस्त्यः। उक्थ्यः। सुनीथः। पाकः। वामः। वयु
नमिति दश प्रशस्यनामानि॥ ८॥ केतुः। केतः। चेतः। चित्तं। क्रतुः। असुः। धीः। शची। माया। वयुनं। अभिख्येत्येकादश प्रज्ञानामानि॥ ९॥ ब
ट्। श्रत्। सत्रा। अद्धा। इत्था। ऋतमिति षट् सत्यनामानि॥ १०॥ चिकयत्। चाकनत्। अचक्षम्। चष्टे। विचष्टे। विचर्षणिः। विश्वचर्षणिः। अव
चाकशदित्यष्टौ पश्यतिकर्मणः॥ ११॥ हिकं। नुकं। सुकं। आहिकं। आकीं। नकिः। माकिः। नकीं। आकृतमिति नवोत्तराणि पदानि सर्वपदस
माम्नानाय॥ १२॥ इदमिव। इदं यथा। अग्निर्न ये। चतुरश्चिद्ददमानात्। ब्राह्मणा व्रतचारिणः। वृक्षस्य नु ते पुरुहूत वयाः। जार आ भगं। मेषो भू
तो ऽभियन्नयः। तद्रूपः। तद्वर्णः। तद्वत्। तथेत्युपमाः॥ १३॥ अर्चति। गायति। रेभति। स्तोभति। गूर्धयति। गृणाति। जरते। ह्वयते। नदति। पृच्छ
ति। रिहति। धमति। कृपायति। कृपण्यति। पनस्यति। पनायते। वल्गूयति। मंदते। भंदते। छंदति। छदयति। शशमानः। रंजयति। रजयति।
शंसति। स्तौति। यौति। रौति। नौति। भनति। पणायति। पणते। सपति। पपृक्षाः। महयति। वाजयति। पूजयति। मन्यते। मदति। रसति॥
स्वरति। स्वदति। वेनति। मंद्रयते। जल्पतीति चतुश्चत्वारिंशदर्चतिकर्माणः॥ १४॥ विप्रः। विग्रः। गृत्सः। धीरः। वेनः। वेधाः। कण्वः। ऋभुः।
नवेदाः। कविः। मनीषी। मंधाता। विधाता। विपः। मनश्चित्। विपश्चित्। विपन्यवः। आकेनिपः। उशिजः। कीस्तासः। अद्धातयः। मतयः। ॥ ९ ॥
मतुथाः। वाघत इति चतुर्विंशतिर्मेधाविनामानि॥ १५॥ रेभः। जरिता। कारुः। नदः। स्तामुः। कीरिः। गौः। सूरिः। नादः। छंदः। स्तुपः। रुद्रः।

कृपण्युरिति त्रयोदश स्तोतृनामानि॥ १६॥ यज्ञः। वेनः। अध्वरः। मेधः। विदथः। नार्यः। सवनं। होत्रा। इष्टिः। देवताता। मखः। विष्णुः। इंदुः। प्रजाप
तिः। घर्म इति पंचदश यज्ञनामानि॥ १७॥ भरताः। कुरवः। वाघतः। वृक्तबर्हिषः। यतस्रुचः। मरुतः। सबाधः। देवयव इत्यष्टावृत्विङ्नामानि॥ १८॥
ईमहे। यामि। मन्महे। दद्धि। शग्धि। पूर्धि। मिमिड्ढि। मिमीहि। रिरिड्ढि। रिरीहि। पीपरत्। यंतारः। यंधि। इषुध्यति। मदेमहि। मनामहे। मायत
इति सप्तदश याच्ञाकर्माणः॥ १९॥ दाति। दाशति। दासति। राति। रासति। पृणक्षि। पृणाति। शिक्षति। तुंजति। मंहत इति दश दानकर्माणः॥ २०॥
परिस्रव। पवस्व। अभ्यर्ष। आशिष इति चत्वारोऽध्येषणाकर्माणः॥ २१॥ स्वपिति। सस्तीति द्वौ स्वपितिकर्माणौ॥ २२॥ कूपः। कातुः। कर्तः। वव्रः। का
टः। खातः। अवतः। क्रिविः। सूदः। उत्सः। ऋश्यदात्। कारोतरात्। कुशयः। केवट इति चतुर्दश कूपनामानि॥ २३॥ तृपुः। तकः। रिभ्वा। रिपुः। रि
क्वा। रिहायाः। तायुः। तस्करः। वनर्गुः। हुरश्चित्। मुषीवान्। मलिम्लुचः। अघशंसः। वृक इति चतुर्दश स्तेननामानि॥ २४॥ निण्यं। सस्वः॥
सनुतः। हिरुक्। प्रतीच्यं। अपीच्यमिति षण्णिर्णीतान्तर्हितनामधेयानि॥ २५॥ आके। पराके। पराचैः। आरे। परावत इति पंच दूरनामानि॥ २६॥
प्रत्नं। प्रदिवः। प्रवयाः। सनेमि। पूर्व्यं। अह्नायेति षट् पुराणनामानि॥ २७॥ नवं। नूत्नं। नूतनं। नव्यं। इदा। इदानीमिति षडेव नवनामानि॥ २८॥
प्रपित्वे। अभीके। दभ्रं। अर्भकं। तिरः। सतः। त्वः। नेमः। ऋक्षाः। स्तृभिः। वम्रीभिः। उपजिह्विका। ऊर्दरं। कृदरं। रंभः। पिनाकं। मेना। ग्नाः। शेपः।
वैतसः। अया। एना। सिषक्तु। सचते। भ्यसते। रेजत इति षड्विंशतिर्द्विश उत्तराणि नामानि॥ २९॥ स्वधे। पुरंधी। धिषणे। रोदसी। क्षोणी॥

अंभसी।नभसी।रजसी।सदसी।सद्मनी।घृतवती।बहुले।गभीरे।गंभीरे।ओण्यो।चम्वो।पार्श्वौ।मही।उर्वी।पृथ्वी।अदिती।अही।दूरेअंते।अपा
रेअपारेइतिचतुर्विंशतिर्द्यावापृथिव्योर्नामधेयानि॥३०॥ उवृथ्दृन्महङ्पद्रद्यानिशिबा।नानिर्णिगस्त्वमाकेतुर्बंटचिकयद्विकमिदमिवार्चेतिवि प्रोरे
मायद्रोभरताईमहेदानिपरिस्नवस्वपातिकूपस्तपुर्निण्यमाकेप्रन्नेनवंप्रपित्वेस्वधेत्रिंशत्॥ ॥इतितृतीयोध्यायः॥ जहा।निधा।शितामं।मेहना।द
मूना।मूषः।इषिरेण।कुरुतन।जठरे।तितउ।शिप्रे।मध्या।मंदू।ईर्मांतासः।कायमानः।लोधं।शीरं।विद्रधे।द्रुपदे।तुग्वनि।नंसंते।नसंतः।आहनसः
अयासत्।इरिमणः।वाहः।पारितक्म्या।सुविते।दयते।नूचित्।नूचा।दावने।अकूपारस्य।शिशीते।सुतुकः।सुप्रायणाः।अप्रायुवः।च्यवनः।रंजः।ह
रः।ऊकुरो।व्यंतः।क्राणाः।वारी।विषुणः।नामिः।पिता।शंयोः।अदितिः।एरिरे।जसुरिः।अरते।मंदिने।गोः।गातुः।दंसयः।तूताव।वयसो।विद्युते॥
ऋधक्।अस्याः।अस्येतिद्विषष्टिःपदानि॥१॥ सस्निं।वाहिष्ठः।दूतः।वावशानः।वार्यं।अंधः।असश्चंती।वनुष्यति।तरुष्यति।भंदना।आहनः।न
दः।सोमो।अक्षाः।श्वात्रं।ऊतिः।हासमाने।पद्भिः।सस्रं।द्विता।व्राः।वराहः।स्वसराणि।शर्याः।अर्कः।पविः।वक्षः।धन्व।सिनं।इत्था।सचा।चित्॥
आ।द्युम्नं।पवित्रं।तोदः।स्वंचाः।शिपिविष्टः।विष्णुः।आघृणिः।पृथुज्रयाः।अथर्युं।काणुका।अध्रिगुः।आंगूषः।आपांतमन्युः।श्मशा।उर्वशी।
वयुनं।वाजपस्त्यं।वाजगंध्यं।गध्यं।गधिता।कौरयाणः।तौरयाणः।अह्रयाणः।हरयाणः।आरितः।व्रंदी।निष्षपी।तूर्णाशं।क्षुंपं।निचुंपुणः।
।पदिं।पादुः।वृकः।जोषवाकं।कृत्तिः।श्वघ्नी।समस्य।कुरुतस्य।चर्षणिः।शंबः।केपयः।तूतुमाकृषे।अंसत्रं।काकुदं।बीरिटं।अष्ट।पारं।॥२॥

सी।एनं।एनां।स्वणिरितिचतुरुत्तरमशीतिपदानि॥२॥ आशुशुक्षणिः।आशोभ्यः।काशिः।कुणारुं।अलातृणः।सल्लूकं।कत्पयं।विस्रुहः।
वीरुधः।नक्षद्दाभं।अस्तृतयोयुः।निशृंभाः।बृबदुक्थं।ऋदूदरः।ऋदूपे।पुरुकामः।आसिन्वती।कपना।भाऋजीकः।रुजानाः।जूर्णिः।ओमनं।
उपलप्रक्षिणी।उपसि।प्रकलवित्।अभ्यर्धयज्वा।ईक्षे।क्षोणस्य।अस्मे।पाथः।सवीमनि।सप्रथाः।विदथानि।श्रायंतः।आशीः।अजीगः।अमू
रः।शशमानः।देवोदेवाच्या।कृपा।विजामातुः।ओमासः।सोमानं।अनवायं।किमीदिने।अमवान्।अमीवा।दुरितं।अप्वा।अमतिः।श्रुष्टी।पुरं
धिः।रुशत्।रिशादसः।सुदत्रः।सुविदत्रः।आनुषक्।तुर्वणिः।गिर्वणासे।असूर्तेसूर्ते।अम्यक्।यादृश्मिन्।जारयायि।अग्रिया।चनः।पचता
।शुरुधः।अमिनः।जज्झतीः।अप्रतिष्कुतः।शाशदानः।सृप्रः।सुशिप्रः।शिप्रे।रंसु।द्विबर्हाः।अक्रः।उराणः।स्तियानां।स्तिया।जबारु।जरूथं।
कुलिशः।तुंजः।बर्हणा।ततनुष्टिं।इलीबिशः।क्रियेधाः।भामः।विष्पितः।तूतुपं।शाम्बिनः।ऋजीतिः।ऋजुनीती।प्रतद्वसू।हिनोत।चोष्कूयमा
णः।चोष्कूयते।सुमत्।दिविष्टिषु।दूतः।जिन्वति।अमत्रः।ऋचीषमः।अनर्शरातिं।अनर्वा।असामि।गल्दया।जल्हवः।बकुरः।बेकनाटान्॥
अभिधेतन।अंहुरः।बतः।वाताप्यं।चाकन्।रथर्यति।असक्राम्।आधवः।अनवब्रवः।सदान्वे।शिरिंबिठः।पराशरः।क्रिविर्दती।करूळती।
दनः।शारुः।इदंयुः।कीकटेषु।बुंदः।वृंदं।किः।उल्बं।ऋबीसंऋबीसमितित्रयस्त्रिंशच्छतंपदानि॥३॥ ॥जहासस्निमाशुशुक्षणिस्त्रीणि

॥ इति निघंटौ चतुर्थोऽध्यायः ॥ अग्निः। जातवेदाः। वैश्वानर इति त्रीणि पदानि ॥ १ द्रविणोदाः। इध्मः। तनूनपात्। नराशंसः। इळः। बर्हिः
द्वारः। उषासानक्ता। दैव्याहोतारा। तिस्रोदेवीः। त्वष्टा। वनस्पतिः। स्वाहाकृतय इति त्रयोदशपदानि २ अश्वः। शकुनिः। मंडूकाः। अक्षाः। ग्रावाणः
। नराशंसः। रथः। दुंदुभिः। इषुधिः। हस्तघ्नः। अभीशवः। धनुः। ज्या। इषुः। अश्वाजनी। उलूखलं। द्रुघणः। वृषभः। पितुः। नद्यः। आपः। ओषधयः।
रात्रिः। अरण्यानी। श्रद्धा। पृथिवी। अप्वा। अग्नायी। उलूखलमुसले। हविर्धाने। द्यावापृथिवी। विपाट्छुतुद्री। आर्त्नी। शुनासीरौ। देवीजोष्ट्री। दे
वीऊर्जाहुती इति षट्त्रिंशत्पदानि ३ वायुः। वरुणः। रुद्रः। इंद्रः। पर्जन्यः। बृहस्पतिः। ब्रह्मणस्पतिः। क्षेत्रस्यपतिः। वास्तोष्पतिः। वाचस्पतिः। अपांनपा
त्। यमः। मित्रः। कः। सरस्वान्। विश्वकर्मा। तार्क्ष्यः। मन्युः। दधिक्राः। सविता। त्वष्टा। वातः। अग्निः। वेनः। असुनीतिः। ऋतः। इंदुः। प्रजापतिः। अहिः। अ
हिर्बुध्न्यः। सुपर्णः। पुरूरवा इति द्वात्रिंशत्पदानि ४ श्येनः। सोमः। चंद्रमाः। मृत्युः। विश्वानरः। धाता। विधाता। मरुतः। रुद्राः। ऋभवः। अंगिरसः। पि
तरः। अथर्वाणः। भृगवः। आप्त्याः। अदितिः। सरमा। सरस्वती। वाक्। अनुमतिः। राका। सिनीवाली। कुहूः। यमी। उर्वशी। पृथिवी। इंद्राणी। गौरी। गौः। धेनुः।
अघ्न्या। पथ्या। स्वस्तिः। उषाः। इळा। रोदसी इति षट्त्रिंशत्पदानि ५ अश्विनौ। उषाः। सूर्या। वृषाकपायी। सरण्यूः। त्वष्टा। सविता। भगः। सूर्यः। पूषा। विष्णुः।
। विश्वानरः। वरुणः। केशी। केशिनः। वृषाकपिः। यमः। अजएकपात्। पृथिवी। समुद्रः। दध्यङ्। मनुः। अथर्वा। आदित्याः। सप्तऋषयः। देवाः। विश्वेदेवाः। साध्याः। वसवः॥ १
वाजिनः। देवपत्न्यो देवपत्न्य इत्येकत्रिंशत्पदानि ॥ ५ ॥

श्रीगणेशायनमः॥ अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा। शास्त्रानुपूर्वं तद्विद्याद्यथोक्तं लोकवेदयोः १ प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धि
भिः। पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिं २ त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शंभुमते मताः। प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा ३ स्वरा विंशति
रेकश्च स्पर्शानां पंचविंशतिः। यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ४ अनुस्वारो विसर्गश्च कःपौ चापि पराश्रितौ। दुःस्पृष्टश्चेति विज्ञेयो ळृकारः
प्लुत एव च ५ आत्मा बुद्ध्या समेत्यार्थान्मनो युंक्ते विवक्षया। मनः कायाग्निमाहंति स प्रेरयति मारुतं। ६ मारुतस्तूरसि चरन्मंद्रं जनयति स्वरं। प्रातः
सवनयोगं तं छंदो गायत्रमाश्रितं ७ कंठे माध्यंदिनयुगं मध्यमं त्रैष्टुभानुगं। तारं तार्तीयसवनं शीर्षण्यं जागतानुगं ८ सोदीर्णो मूर्ध्न्यभिहतो वक्त्र
मापद्य मारुतः। वर्णाञ्जनयते तेषां विभागः पंचधा स्मृतः ९ स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः। इति वर्णविदः प्राहुर्निपुणं तं निबोधत। १० उ
दात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः। ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ११ उदात्ते निषादगांधारावनुदात्त ऋषभधैवतौ। स्वरितः प्र
भवा ह्येते षड्जमध्यमपंचमाः। १२ अष्टौ स्थानानि वर्णानामुरः कंठः शिरस्तथा। जिह्वामूलं च दंताश्च नासिकोष्ठौ च तालु च १३ ओभावश्च विवृ
त्तिश्च शषसा रेफ एव च। जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः १४ यद्योभावप्रसंधानमुकारादिपरं पदं। स्वरांतं तादृशं विद्याद्यदन्यद्व्य
क्तमूष्मणः १५ हकारं पंचमैर्युक्तमंतस्थाभिश्च संयुतं। औरस्यं तं विजानीयात्कंठ्यमाहुरसंयुतं १६ कंठ्यावहाविचुयशास्तालव्या ओष्ठ्या
वुपू। स्युर्मूर्धन्या ऋटुरषा दंत्या ऌतुलसाः स्मृताः १७ जिह्वामूले तु कुः प्रोक्तो दंत्योष्ठ्यो वः स्मृतो बुधैः। ए ऐ तु कंठतालव्या ओ औ कंठो

चऔरौस्मृतौ अर्धमात्रातुकंठ्यास्यादेकारैकारयोर्भवेत् ऒकारौकारयोर्मात्रा तयोर्विवृतसंवृतं १९ संवृतंमात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकं। घोषावासं
वृताः सर्वे अघोषाविवृताःस्मृताः २० स्वराणामूष्मणां चैवविवृतंकरणंस्मृतं। तेभ्योपिविवृतावेङौताभ्यामैचौ तथैव च २१ अनुस्वारयमानांचनासिका
स्थानमुच्यते। अयोगवाहाविज्ञेयाआश्रयस्थानभागिनः २२ अलाबुवीणानिर्घोषो दंत्यमूल्यस्वराननु। अनुस्वारस्तु कर्तव्यो नित्यंह्नोःशषसे
षु च २३ अनुस्वारेविवृत्त्यांतुविरामेचाक्षरद्वये। द्वि रोष्ठ्यौ तु विगृह्णीयाद्यत्रौकारवकारयोः २४ व्याघ्री यथा हरेत्पुत्रान्दंष्ट्राभ्यां न च पीड
न ७ येत्। भीतापतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् २५ यथा सौराष्ट्रिका नारी तक्रँ इत्यभिभाषते। एवं रंगाःप्रयोक्तव्याः खे अराँ इव खेदया २६
रंगवर्णंप्रयुंजीरन्नोग्रसेत्पूर्वमक्षरं। दीर्घस्वरंप्रयुंजीयात्पश्चान्नासिक्यमाचरेत् २७ हृदयेचैकमात्रस्त्वर्धमात्रस्तुमूर्धनि। नासिकायांतथार्ध २०
चरंगस्यैवंद्विमात्रता २८ हृदयादुत्करेतिष्ठन्कांस्येनसमनुस्वरन्। मार्दवं च द्विमात्रं च जघन्वाँ इति निदर्शनं २९ मध्येतु कंपयेत्कंपमुभौपा
र्श्वौसमौभवेत्। सरंगं कंपयेत्कंपं रथीवेति निदर्शनं ३० एवं वर्णाःप्रयोक्तव्या नाव्यक्ता न च पीडिताः। सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ३१
गीती शीघ्री शिरःकंपी तथा लिखितपाठकः। अनर्थज्ञोल्पकंठश्च षडेते पाठकाधमाः ३२ शंकितं भीतमुद्घुष्टमव्यक्तमनुनासिकं। काकस्वरं
शिरसिगतं तथा स्थानविवर्जितं। ३४ उपांशुदष्टंत्वरितं निरस्तं वि Xमाधुर्यमक्षरव्यक्तिःपदच्छेदस्तु सुस्वरः। धैर्यं लयसमर्थं च षडेते पाठका गुणाः॥X३३
लंबितंगद्गदितंप्रगीतं। निष्पीडितंग्रस्तपदाक्षरं च वदेन्नदीनं न तु सानुनास्यं ३५ प्रातःपठेन्नित्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन। मध्यं

राम

दिनेकंठगतेनचैवचक्राह्वसंकूजितसंनिभेन॥३६॥तारंतुविद्यात्सवनंतृतीयंशिरोगतंतच्चसदाप्रयोज्यं मयूरहंसान्यभृतस्वराणांतुल्येननादेन
शिरस्थितेन॥३७॥अचोस्पृष्टायणस्त्वीषन्नेमिस्पृष्टाःशलस्तथा। शेषाःस्पृष्टाहलःप्रोक्तानिबोधानुप्रदानतः॥३८॥यमोनुनासिकानह्नौना
दिनोहझषस्मृताः। ईषन्नादायणजश्चश्वासिनस्तुखफादयः॥३९॥ईषच्छ्वासांश्चरोविद्याद्गोर्धामैतत्प्रचक्षते। दाक्षीपुत्रःपाणिनिनायेनेदंव्यापितं
भुवि॥४०॥छंदःपादौतुवेदस्यहस्तौकल्पोथपठ्यते। ज्योतिषामयनंचक्षुर्निरुक्तंश्रोत्रमुच्यते॥४१॥शिक्षाघ्राणंतुवेदस्यमुखंव्याकरणंस्मृतं।
तस्मात्सांगमधीत्यैवब्रह्मलोकेमहीयते॥४२॥उदात्तमाख्यातिवृषोंगुलीनांप्रदेशिनीमूलनिविष्टमूर्धा। उपांतमध्येस्वरितंधृतंचकनिष्ठिका
यामनुदात्तमेव॥४३॥उदात्तंप्रदेशिनींविद्यात्प्रचयंमध्यतोंगुलिं। निहतंतुकनिष्ठिक्यांस्वरितोपकनिष्ठिकां॥४४॥अंतोदात्तमाद्युदात्तमुदात्त
मनुदात्तंनीचस्वरितं। मध्योदात्तंस्वरितंद्व्युदात्तंत्र्युदात्तमितिनवपदशय्या। कनिष्ठिकनिष्ठादितथैवानामिकास्यकं। मध्यमांगुलिमध्यस्थंस्वरन्यासंविधीयतेX
दर्शयेत्॥४५॥अग्निःसोमःप्रवोवीर्यंहविषांस्वर्बृहस्पतिरिंद्राबृहस्पती। अग्निरित्यंतोदात्तंसोमइत्याद्युदात्तंप्रेत्युदात्तंवइत्यनुदात्तंवीर्यंनीच
स्वरितं॥४६॥हविषांमध्योदात्तंस्वरितिस्वरितं। बृहस्पतिरितिद्व्युदात्तमिंद्राबृहस्पतीइतित्र्युदात्तं ४८ अनुदात्तोहृदिज्ञेयोमूर्ध्न्युदात्तउदा
हृतः। स्वरितःकर्णमूलीयःसर्वास्येप्रचयःस्मृतः॥४९॥चाषस्तुवदतेमात्रांद्विमात्रंत्वेववायसः। शिखीरौतित्रिमात्रंतुनकुलस्त्वर्धमात्र राम
कं॥५०॥कुतीर्थादागतंदग्धमपवर्णंचभक्षितं। नतस्यपाठेमोक्षोस्तिपापाहेरिवकिल्बिषात्॥५१॥सुतीर्थादागतंव्यक्तंस्वाम्नायंसुव्यव

१० स्थितां सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ५२ मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथें
द्रशत्रुः स्वरतोऽपराधात् ५३ अनक्षरं हतमायुष्यं विस्वरं व्याधिपीडितं। अक्षता शस्त्ररूपेण वज्रं पतति मस्तके ५४ हस्तहीनं तु योऽधीते स्वर
वर्णविवर्जितं। ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ५५ हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतं। ऋग्यजुःसामभिः पूतो ब्रह्मलोके म
हीयते ५६ शंकरः शांकरीं प्रादाद्दाक्षीपुत्राय धीमते। वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ५७ येनाक्षरसमाम्नायमधिगम्य
महेश्वरात्। कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ५८ येन धौता गिरः पुंसां विमलैः शब्दवारिभिः। तमश्चाज्ञानजं भिन्नं तस्मै पा
णिनये नमः ५९ अज्ञानांधस्य लोकस्य ज्ञानांजनशलाकया। चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ६० त्रिनयनमभिमुख
निस्सृतामिमां य इह पठेत्प्रयतश्च सदा द्विजः। स भवति धनधान्यपशुपुत्रकीर्तिमान् अतुलं च सुखं समश्नुते दिवीति दिवीति ६१
इति शिक्षा समाप्ता अथ शिक्षामात्मोदात्तश्च यकारं स्वसाराणां यथागीत्यचो स्पृष्टो दान्तं चापस्तु शंकर एकादश
पंचसंवत्सरमयं युगाध्यक्षं प्रजापतिं। दिनर्त्वयनमासांगं प्रणम्य शिरसा शुचिः १ प्रणम्य शिरसा कालमभिवाद्य सरस्वतीं। काल
ज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः २ ज्योतिषामयनं कृत्स्नं प्रवक्ष्याम्यनुपूर्वशः। विप्राणां संमतं लोके यज्ञकालार्थसिद्धये ३
निरेकं द्वादशार्धाब्दं द्विगुणं गतसंज्ञिकं। षष्ट्या षष्ट्या युतं द्वाभ्यां पर्वणां राशिरुच्यते ४ स्वराक्रमेते सोमार्कौ यदा साकं सवा १०

सवौ। स्यात्तदादि युगं माघस्तपः शुक्लोऽयनं ह्युदक् ५ प्रपद्येते श्रविष्ठादौ सूर्याचंद्रमसावुदक्। सार्पार्धे दक्षिणार्कस्तु माघश्रावण
योः सदा ६ धर्मवृद्धिरपां प्रस्थः क्षपाह्रास उदग्गतौ। दक्षिणे तौ विपर्यस्तौ षण्मुहूर्त्ययनेन तु ७ द्विगुणं सप्तमं चाहुरयनाद्यं त्रयोद
श। चतुर्थं दशमं चैव द्विर्युग्माद्यं बहुलेऽप्यृतौ ८ वसुस्त्वष्टा भगोऽजश्च मित्रः सर्पाश्विनौ जलं। धाताकश्चायनाद्याश्चार्धपंचमभस्त्वृ
तुः ९ भांशास्युरष्टकाः कार्याः पक्षा द्वादशकोद्गताः। एकादशगुणः स्योनः शुक्लेऽर्धं चैंदवा यदि १० कार्याभांशाष्टकास्थाने कला एका
न विंशतिः। ऊनस्थाने द्विसप्ततीरुद्वपेदूनसंमिताः ११ त्र्यंशी भशेषो दिवसांशो भागश्चतुर्दशस्याप्युपनीत्ता भिन्नं। भार्धेऽधिके चाधि
गते परेंऽशो द्वावुत्तमे कं नवकैरवेद्यं १२ पक्षात्पंचदशाद्वोर्ध्वं तद्भुक्तमिति निर्दिशेत्। नवभिस्तूद्गतोंऽशः स्याद्दूनोंऽशद्व्यधिकेन तु १३ जौ
ऽद्राघः खेश्वेहीरोषाचिन्मूषण्यः सोमाधानः। रेमृधाश्वाऽपःजस्त्रिषोहर्येष्ठा इत्यृक्षालिंगैः १४ नाबाधंशैः समं विद्यात्पूर्वार्धे
पार्वसूत्तरे। भादानांशाश्चतुर्दशीकाष्ठानां देवि नाकलाः १५ कलादशा च विंशा स्याद्द्विमुहूर्तस्तु नाडिके। द्युत्रिंशत्तत्कलानां तु षट्
शती त्र्यधिकं भवेत् १६ नाडिके द्वे मुहूर्तस्तु पंचाशत्पलमाषकं। माषकात्कुंभको द्रोणः कुटपैर्वर्धते त्रिभिः १७ ससप्तकं भयुक्
स्योनः सूर्या द्यो निं त्रयोदश। नवमानि च पंचाह्नः काष्ठा पंचाक्षरास्मृताः १८ श्रविष्ठाभ्यां गुणाभ्यस्तान्प्राग्विलग्नान्विनि
र्दिशेत्। सूर्यान्मासान्षळभ्यस्तान्विद्याच्चांद्रमसानृतून् १९ अतीतपर्वभागेषु शोधयेद्द्विगुणां तिथिं। तेषु मंडलभागेषु ति

थिनिष्ठांगतोरविः २० याः पर्वभादानकलास्तासु सप्तगुणां तिथिं। प्रक्षिपेत्कलासमूहस्तु विद्यादादानकीः कलाः २१ यदुत्तरस्यायन
११ तोयनं स्याच्छेषं तु यद्दक्षिणतोयनस्य। तदेव षष्ट्या द्विगुणं विभक्तं [illegible] द्वादशं स्याद्दिवसप्रमाणं २२ तदर्धं दिनभागानां सदापर्वणि पर्व
णि। ऋतु शेषं तु तद्विद्यात्संख्याय सह पर्वणां २३ इत्युपायसमुद्देशो भूयोप्यन्नं कं प्रकल्पयेत्। ज्ञेयराशिं गताभ्यस्ता न्विभजेज्ज्ञानराशि
षु २४ अग्निः प्रजापतिः सोमो रुद्रो दितिर्बृहस्पतिः। सर्पाश्च पितरश्चैव भगश्चैवार्यमापि च २५ सविता त्वष्टाथ वायुश्चेन्द्राग्नी मित्र
एव च। इंद्रो निर्ऋतिरापो वै विश्वेदेवास्तथैव च २६ विष्णुर्वसवो वरुणोजएकपात्तथैव च। अहिर्बुध्न्यस्तथा पूषा अश्विनौ यम एव च॥
नक्षत्रदेवता एता एताभिर्यज्ञकर्मणि। यजमानस्य शास्त्रज्ञैर्नाम नक्षत्रजं स्मृतं २८ इत्येतन्मासवर्षाणां मुहूर्तोदयपर्वणां॥ दिनर्त्व
यनमासांगं व्याख्यातं लगधोब्रवीत् २९ सोमसूर्यस्त्रिचरितो लोकान्लोके च संमितं। सोमसूर्यस्तृचरितो विद्वान्वेदविद
श्नुते ३० विषुवं तद्गुणं द्वाभ्यां रूपहीनं तु षड्गुणं। यल्लब्धं तानि पर्वाणि तथो र्ध्वं सा तिथिर्भवेत्। ३१ माघशुक्लप्रपन्नस्य पौ
षकृष्णसमापिनः। युगस्य पंचवर्षाणि कालज्ञानं प्रचक्षते। ३२ तृतीयां नवमीं चैव पौर्णमासीं त्रयोदशीं। षष्ठीं च विषु
वान्प्रोक्तो द्वादश्यां च समं भवेत् ३३ चतुर्दशीमुपवसथस्तथा भवेद्यथोदितो दिनमुपैति चंद्रमाः। माघशुक्लाह्निको युं
क्ते श्रविष्ठायां च वार्षिकीं म् ३४ ११

यथा शिखा मयूराणां नागानां मणयो यथा। तद्वद्वेदांगशास्त्राणां ज्योतिषं मूर्धनि स्थितं ३५ वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानु
पूर्वा विहिताश्च यज्ञाः। तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्यो ज्योतिषं वेद स वेद यज्ञानिति ३६ इति ज्यो
तिषं समाप्तं ० शके १६४३ प्लवसंवत्सर भाद्रपदशुक्लप्रतिपद्यां भट्टदामोदरेणेदं पुस्त
कं लिखितं स्वार्थं परोपकारार्थम् ७ नन्दस्ये प्रतिपद्यां तु शुक्ले दामोदरेण वै ।। लिखितं पुस्तकं चाथ पेत्र कैलेस्मि ॥
रे दिने ॥४॥

आचम्य. भद्रं कर्णेभ्यःसमंप्रोक्षि। पुनः पी आचम्य स्वात्वा• आपो अ स्मान्मा• मि। इदमापः प्र०तं। कृमिभ्या• संतु। हृतेरप्युपरेण। उम्नेत हं नो अ वो ने तरसो अप्सु अत्तः। उन्नेजोनी यथा ना अर्पत्ति। उद्वयं तमस [illegible] र। देवं• मं। आदि
१५ अनुमरक्षणा। अन्वे वे स्मामाण्यहस्ता। [illegible] होहासन व दसंख्या। संस्था अमम कल्वो दयनी वे द्विः। नमः प्रव कद्रुसादि• आवाहने• अग्निं। अग्न आ वह। सोमं आवह। सवितारं आवह। पथ्यां स्वस्ति आ वह। अदितिं आ वह। देवां अ
यथा वक्ष्यादि• जुष्टिमश्मा ओं। वे• हे स्वाहा। अग्निं स्वाहा। सोमं स्वाहा। सवितारं स्वाहा। पथ्यां स्वस्तिं स्वाहा। अदितिं स्वाहा। देवां आज्यपा वक्ष्यादि• अग्ने वा नो मा यिव धाम• कृष्णुयाति। ओं। ये• हे। अग्निर्नेता नयबेक पथाय व
ऐमा इ वौषट्। या ते धामानि दिवि [illegible] मभा मा। ओं। ये• हे। सोमं त्वं सोम प्रचिकितो०पी राइ वौषट्। पथ्या मा [illegible] नान्या भा• ताओं। ये• हे। सविता रमा विश्वे देवस्य• सविता रं धी• स्वस्ति रि [illegible] पथे• [illegible] ओं। ये• हे। पथ्या स्व
१२ स्ति स्वस्तिः पथ्या सु धा• तना इ वौषट्। महीमू षुमातरं सुव्रता• स्त प्रपदे। तिं। ओं। ये• हे। अदितिं सु नामानं पृथिवी• इ सत्ता इवो• अथा स्विष्ट कृतः। से ये [illegible] रस्य• समे [illegible]। ये इ [illegible] स्व कत मद्याद [illegible] अ
ग्ने। प्रियधामा न्यया इ। सोमस्य। प्रि• सविता। प्रि• पा इ। पथ्यायाः स्वस्तेः। प्रिया• इ। अदितेः। प्रि• इ देवानामाज्यपानां प्रियादि• कृपतां हवि। से [illegible] वीवो वौषट्। [illegible] भद्दो नावेना दुर्न।

हं सु नं तामसं तुष्टेते। अथ मैत्रावरुण्या मिक्षाया भाग प्रभृति पाजिनांता। [illegible] मैत्र विश्वयो [illegible] वेदेः पश्चा दुपविश्य वाजं भूम्या धाय भागौ। प्रधानस्य। आ नो मित्रावरुणा घृ• तां मध्वा रजांसि• [illegible] मैत्रावरुणौ यह
हविषं ना• या। तेन• स्वामा वौ०॥ अथ भाज्यादीनां भागः॥ ॥ तवोषां कृ। धामा वहा नु पामु• नां। तवंदे• वाजिनीयन॥ ओं। ये• हे। धाता प्र आनामुन• नं धा• क हेतावो २०॥ अनुनो द्या नु मा [illegible] ने• तां [illegible] मयोहभी।
ये• हे। अग्नि दनुमनेत्वं• छि• कल्वे• बालवो०। राकामहं सु• क्ष्यं प्र• ओं। ये• हे। भास्तिरकेस• रयामा वौषट्। सिनी वालि षृथु• नः। ओं। ये• हे। पाकवा कु• नो २ वो• कुहूमहं सु• विधेम ओं। ये• [illegible] हे देवानामम•
दधातु वौ०॥ अथ स्विष्ट कृतः। प्रिया हि देवां• यानस्ये॥ ये• हे अग्निं स्विष्ट कृतमग्नेयदद्य। विशां अध्वरस्य होतः• अवा इ वौषट्। संस्थितायां सर्व प्रायश्चित्ता नि कृत्वा संस्था [illegible] नोपद [illegible] निष्क्रमणम था
वपि होता। ॥आग्निषोमस्य होतृंसमाप्तम्॥ १॥
=अन्तया नावेदया नितना तस्मे। न=

१२